www.shaivam.org

# ચન્દ્રમૌલીશ્વર વર્ણમાલા સ્તુતિઃ

શ્રીપતિપ્રમુખાદેવાઃ સ્વેપ્સિતાર્થસ્ય સિદ્ધયે ।
યં સ્તુવન્તિ સમર્ચન્તિ નમન્તિ ચ ભજામિ તં ।। ૧ ।।
ચંચચ્ચન્દ્રકલાચૂડઃ ચન્દ્રિકાધવલઃ શિવઃ ।
પ્રત્યચં સ્ફોરયત્યાશુ ચચલે હૃદયે મમ ।। ૨ ।।
દ્રવી ભવતિ યસ્યૈવ હૃદયં સ્મૃતિમાત્રતઃ ।
દ્રપ્સવન્મધુરાં વાચાં દૃઢયત્વનિશં સ નઃ ।। ૩ ।।
મૌલે મન્દાકિનિ યસ્ય માલતી માલિકા નિભા ।
મૌનિમાનસહંસોઽયં મૌઢ્યં હરતુ નઃ શિવઃ ।। ૪ ।।
લીનં યોગિમનો યત્ર તથા જગદપિ ધ્રુવે ।
લીઢં મજ્જિહ્વયા નિત્યં કરોતુ નીજનામ સઃ ।। ૫ ।।
સ્વસ્તના નૈવ વિષયા દુઃખસંભિન્નસૌખ્યદાઃ ।
જ્ઞાત્વાપ્યેવં તત્ર સક્તં મુક્તિમાર્ગાધ્વગં કુરુ ।। ૬ ।।
રોદિમિ કક શુગામીઢહૃદયોઽહં દયાનિધે ।
કસ્યાદ્રમસ્તુ હૃદયં ત્વાં વિના મયિ શઙ્કરઃ ।। ૭ ।।
વિઘ્નેશ્વરગુહાશ્લિષ્ટવામદક્ષિણભાગ ભાક ।
વિદ્યાં મે દિશતુ બ્રહ્મવિષયાં ગિરિજાપતિઃ ।। ૮ ।।
જપધ્યાનાર્ચ્નસ્તોત્રવન્દનૈઃ સુરભૂસુરાઃ ।
યં તોષયન્તિ સતતં સ શિવો નઃ પ્રસીદતુ ।। ૯ ।।
યતશ્ચૈર્યોગિવર્યૈર્ધ્યાયમાનપદામ્બુજમ ।
યમભીતિવિનાશાય યામ્યહં શરણં શિવમ ।। ૧૦ ।।
તેનૈવ પાવિતા પૃથ્વી તેનૈવ કુલમુદ્ધૃતમ ।
યેન શંભો પદામ્ભોજયુગલે સ્વાર્પિતં મનઃ ।। ૧૧ ।।
ચન્દ્રમૌલીશ્વરસ્તોત્રં ભક્ત્યા યઃ પઠતિ પ્રગે ।
તસ્ય શ્રીચન્દ્રમૌલીશઃ કાઙ્ક્ષિતાનિ પ્રયચ્છતિ ।। ૧૨ ।।

www.shaivam.org